# MahapranadipaM Shivam

# મહાપ્રાણદીપં શિવમ્

## Document Information

Text title : Mahapranadipam Shivam

File name : mahAprANadIpaMshivam.itx

Category : shiva, sanskritgeet

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : from the Kannada movie □r□ Ma□jun□tha.

Latest update : November 11, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2023

*sanskritdocuments.org*

# મહાપ્રાણદીપં શિવમ્

ॐ

મહાપ્રાણદીપં શિવં શિવમ્ ।
(મ)હૌંકાર રૂપં શિવં શિવમ્ ।
મહાસૂર્યચન્દ્રાગ્નિનેત્રં પવિત્રમ્ ।
મહાગાઢ તિમિરાન્તકં સૌરગાત્રમ્ ।
મહાકાન્તિબીજં મહાદિવ્યતેજમ્ ।
ભવાનિ-સમેતં ભજે મઞ્જુનાથમ્ ॥

ॐ

નમઃ શઙ્કરાય ચ મયસ્કરાય ચ ।
નમઃ શિવાય ચ શિવતરાય ચ ।
ભવહારાય ચ ॥

મહાપ્રાણદીપં શિવં શિવમ્ ।
ભજે મઞ્જુનાથં શિવં શિવમ્ ॥

અદ્વૈતભાસ્કરં અર્ધનારીશ્વરમ્ ।
ત્રિદશહૃદયઙ્ગમં ચતુર્ગતિસઙ્ગમમ્ ।
પઞ્ચભૂતાત્મકં શતશત્રુનાશકમ્ ।
સપ્તસ્વરેશ્વરં અષ્ટસિદ્ધીશ્વરમ્ ।
નવરસમનોહરં દશદિશાસુવિમલમ્ ॥

એકાદશોજ્જ્વલં ઐકનાથેશ્વરમ્ ।
પ્રસ્તુતિવ શઙ્કરં પ્રણત-જન-કિઙ્કરમ્ ।
દુર્જનભયઙ્કરં સજ્જનશુભઙ્કરમ્ ।
પ્રાણિ-ભવતારકં પ્રકૃતિ-હિતકારકમ્ ।
ભુવન-ભવ્ય-ભવનાયકં ભાગ્યાત્મકમ્ ॥

રક્ષકમ્ ॥

ઈશં સુરેશં વૃષેશં પરેશમ્ ।
નટેશં ગૌરીશં ગણેશં ભૂતેશમ્ ।
મહામધુર-પઞ્ચાક્ષરી-મન્ત્રમાર્ચમ્ ।
મહાહર્ષ વર્ષ પ્રવર્ષં સુશીર્ષં ॥

ૐ

નમો હરાય ચ સ્મરહરાય ચ ।
પુરહરાય ચ રુદ્રાય ચ ભદ્રાય ચ ।
ઇન્દ્રાય ચ નિત્યાય ચ નિર્નિદ્રાય ચ ॥

મહાપ્રાણદીપં શિવં શિવમ્ ।
ભજે મઞ્જુનાથં શિવં શિવમ્ ॥

ડં ડં ડ ડં ડં ડ
ડં ડં ડ ડં ડં ડ
ઢક્કાન્નિનાદ નવતાણ્ડવાડમ્બરમ્ ।
તદ્ધિમ્મિ તકદ્ધિમ્મી ધિદ્ધિમ્મિ ધિમિદ્ધિમ્મી ।
સઙ્ગીત સાહિત્ય શુભકમલભમ્ભરમ્ ॥

ૐકાર હ્રીંકાર શ્રીંકાર ઐંકાર મન્ત્રબીજાક્ષરં મઞ્જુનાથેશ્વરં ।
ઋગ્વેદમાદ્યં યજુર્વેદવેદ્યં સામપ્રગીતં અથર્વપ્રભાતમ્ ।
પુરાણેતિહાસં પ્રસિદ્ધં વિશુદ્ધમ્ ।
પ્રપઞ્ચૈકસૂત્રં વિબુદ્ધં સુસિદ્ધમ્ ॥

ન-કારં મ-કારં શિ-કારં વ-કારં ય-કારં નિરાકરસાકારસારમ્ ।
મહાકાલાકાલં મહાનીલકણ્ઠં મહાનન્દનન્દં મહાટ્ટાટહાસમ્ ।
જટાજૂટતરઙ્ગૈકગઙ્ગાસુચિત્રં જ્વલદ્રુદ્રનેત્રમં સુમિત્રં સુગોત્રમ્ ॥

મહાકાશિવાસં મહાભાનુલિઙ્ગમ્ ।
મહાભર્તૃ વર્ણં સુવર્ણં પ્રવર્ણમ્ ॥

સૌરાષ્ટ્રસુન્દરં સોમનાથેશ્વરમ્ ।
શ્રીશૈલમન્દિરં શ્રીમલ્લિકાર્જુનમ્ ।
ઉજ્જયિનિપુર મહાકાલેશ્વરમ્ ।
વૈદ્યનાથેશ્વરં મહાભીમેશ્વરમ્ ।
મમલલિઙ્ગેશ્વરં રા(ભા??)મલિઙ્ગેશ્વરમ્ ।

કાશીવિશ્વેશ્વરં પરંઘૃષ્મેશ્વરમ્ ।
ત્ર્યમ્બકાધીશ્વરં નાગલિઙ્ગેશ્વરમ્ ।
શ્રીકેદારલિઙ્ગેશ્વરમ્ ॥

અગ્નિલિઙ્ગાત્મકં જ્યોતિર્લિઙ્ગાત્મકમ્ ।
વાયુલિઙ્ગાત્મકં આત્મલિઙ્ગાત્મકમ્ ।
અખિલલિઙ્ગાત્મકં અગ્નિસોમાત્મકમ્ ॥

અનાદિં અમેયં અજેયં અચિન્ત્યમ્ ।
અમોઘં અપૂર્વં અનન્તં અખણ્ડમ્ ॥

ધર્મસ્થલક્ષેત્રવર પરઞ્જ્યોતિમ્ ॥

ૐ નમઃ ।
સોમયા ચ સૌમ્યાય ચ ।
ભવ્યાય ચ ભાગ્યાયા ચ ।
શાન્તાય ચ શૌર્યાય ચ ।
યોગાય ચ ભોગાય ચ ।
કાલાય ચ કાન્તાય ચ ।
રમ્યાય ચ ગમ્યાયચ ।
ઈશાય ચ શ્રીશાય ચ ।
શર્વાય ચ સર્વાય ચ ॥

Encoded and proofread by Ruma Dewan

Notes:
The composition is from the Kannada
movie Śrī Mañjunātha શ્રી મઞ્જુનાથ.
Closest transliteration to Devanāgarī
દેવનાગરી is given here, with some
pronunciations adhering to the vocal rendering.
Lyricist : Sri Vedavyasa

*MahapranadipaM Shivam*

pdf was typeset on November 21, 2023

Please send corrections to *sanskrit@cheerful.com*